# संस्कृतवार्ताः

दिनाङ्कः-२०१०.११.२४

सायम्-०६.१०

प्रवाचकः/अनुवादकः- बलदेवानन्दसागरः

आलेखपरिष्कारकः- दिव्यानन्दझाः

इयमाकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचकः- बलदेवानन्दसागरः

# मुख्यवार्ताः

- बिहार-विधानसभायाः निर्वाचनपरिणामेषु जनतादलसंयुक्त-भाजपा-संयुतिः प्रशस्तं विजयं प्रत्यग्रेसरति।

- श्रीनीतीशकुमारः द्वितीयवारं बिहारस्य मुख्यमन्त्रित्वेन शुक्रवासरे स्वीय-कार्यभारमावक्ष्यति।

- आन्ध्रप्रदेशस्य मुख्यमन्त्री के.रोसैय्या स्वपदमत्यजत्।

अपि च,

- भाजपादलं निगदति यत् बी.एस्.येदियुरप्पा कर्णाटकस्य मुख्यमन्त्रित्वेन स्थास्यति।

-----------------------------------

## बिहारम्/परिणामाः

बिहार-विधानसभायाः निर्वाचनपरिणामेषु जनतादलसंयुक्त-भाजपा-संयुतिः प्रशस्तं विजयं प्रत्यग्रेसरति। विधानसभायाः त्रिचत्वारिंशदुत्तर-द्विशतमितेषु स्थानेषु पञ्चसप्ततेः स्थानानां परिणामाः अधिगताः। एतेषु जनतादल-संयुक्त-भाजपा-संयुतिः ऊनसप्ततिः आसनानि विजितवती। अपि चैषा षष्ट्युत्तरशतं स्थानेषु अग्रत्वं भजते। मुख्यमन्त्री नीतीशकुमारः, उपमुख्यमन्त्री सुशीलकुमारमोदी, भाजपा-प्रदेशाध्यक्षः सी.पी.ठाकुरः, राष्ट्रियजनतादलाध्यक्षः लालूप्रसादयादवश्च ऐषमो विधानसभा-निर्वाचनेषु नैवास्पर्धन्त। निर्वाचन-परिणामान् संलक्ष्य प्रतिक्रियमाणो भारतीय-जनतापार्टी-अध्यक्षः अवदत् यत् राज्ये राजनीतेः दिशाः विपरिवर्तन्ते इति तु सुस्पष्टम्। वंशवादोऽयं पराजयोन्मुखः प्रतीयते।

श्रीनितिनगड़करी अवदत् यत् जनतादलसंयुक्त-भाजपा-संयुतिः साफल्यम् अधिगच्छतीति तु नूनं देशस्य अनागतं नूतनां दिशामवाप्स्यति।

बिहारस्य मुख्यमन्त्री जनतादलसंयुक्तस्य वरिष्ठो नेता नीतीशकुमारः न्यगादीत् यत् बिहारवास्तव्याः राज्ये प्रवर्तमानानि विकासकार्याणि सततमग्रेसारयितुमिच्छन्तीति तु निर्वाचनपरिणामैः सुस्पष्टं भवति।

**नीतीशकुमारः**

श्रीनीतीशकुमारः द्वितीयवारं बिहारस्य मुख्यमन्त्रित्वेन शुक्रवासरे स्वीय-कार्यभारमावक्ष्यति।

तत्रान्तरे वृत्तमधिगतं यत् जनतादल-संयुक्त-भाजपा-संयुतिः बिहारविधानसभानिर्वाचनेषु बहुसंख्यात्वमध्यगच्छत्।

## कॉन्ग्रेस्दलम्

कॉन्ग्रेस्दलाध्यक्षा श्रीमती सोनियागान्धी जनतादलसंयुक्त-भाजपासंयुतेः विजयमाधृत्य नीतीशकुमारं वर्धापितवती। अपि च, न्यगादीत् यत् राज्ये कॉन्ग्रेस्दलम् एकाकि एव निर्वाचनानि स्पर्धितवत्, अपि चानेन नाधिकं साफल्यमभिकाङ्क्षितमासीत्। प्रधानमन्त्री डॉ.मनमोहनसिंहः बिहारविधानसभा-निर्वाचनेषु अधिगत-प्रशस्तविजयोपरि नीतीशकुमारम् अभ्यनन्दत्।

## संसद्

द्वि-जी-स्पैक्ट्रम्-आबण्टन-प्रवञ्चनाप्रकरणमाधृत्य अनुक्रमम् अद्य नवमेऽपि कार्यदिवसे संसदः सदनद्वयस्य कार्यजातं बाधितम्। संसदः सदनद्वयेऽपि विपक्षसांसदैः विषयोऽयमुत्थापितः। उग्रकोलाहलकारणाच्च सदनकार्यजातं स्थगितीकृतमासीत्।

## रोसैय्या

आन्ध्रप्रदेशस्य मुख्यमन्त्री के.रोसैय्या स्वपदमत्यजत्।

पूर्वम्, हैद्राबादे जनसम्मर्दसमाकुलिते वार्ताहरसम्मेलनेऽसौ एतद्विषयकं स्वीय निर्णयमुदघोषयत्।

अनन्तरमसौ, स्वीयं त्यागपत्रं राज्यपालाय ई.एस्.एल्. नरसिम्हन्-महोदयाय आर्पयत् । अपि च, तत्कालमेव एनत् स्वीकर्तुं साग्रहमध्यार्थयत्।

त्यागपत्रप्रदानस्य कारणानि ख्यापयन् श्रीरोसैय्या अवदत् यत् वार्धक्यकारणात् कार्यापीडहेतोश्च असौ स्वपदं त्यक्तुं निरणैषीत्।

## येदियुरप्पा

भाजपादलं निगदति यत् बी.एस्.येदियुरप्पा कर्णाटकस्य मुख्यमन्त्रित्वेन स्थास्यति। वार्ताहरैः सम्भाषमाणः दल-प्रवक्ता प्रकाशजावडेकरः अवदत् यत् येदियुरप्पा-महोदये समाक्षिप्तान् आक्षेपान् भाजपादलम् अन्वीक्षिष्यते।

।। इति वार्ताः ।।